## एतदोऽश्[1]। (५/१९६१)

प्राग्दिशः इत्येव। एतदः[2] प्राग्दिशीये परतः अश् इत्ययमादेशो भवति। शकारः सर्वादेशार्थः। अतः। अत्र। एतदः इति योगविभागः कर्तव्यः (म. भा. २.४०३)। एतदो रथोः परत एत इत् इत्येतावादेशौ भवतः। एतर्हि। इत्थम्[3]। रेफादिः 'अनद्यतने र्हिलन्यतरस्याम्' (५.३.२१/१९६९) इति विद्यत एव। थमुप्रत्ययः पुनरेतद उपसङ्ख्येयः॥

## सर्वस्य सोऽन्यतरस्यां दि। (६/१९६२)

सर्वस्य स इत्ययमादेशो भवति प्राग्दिशीये दकारादौ प्रत्यये परतोऽन्यतरस्याम्। [4]सर्वदा। सदा। प्राग्दिशीये इत्येव, सर्वं ददाति इति सर्वदा ब्राह्मणी॥

## पञ्चम्यास्तसिल्। (७/१९६३)

पञ्चम्यन्तेभ्यः किंसर्वनामबहुभ्यः [5]तसिल् प्रत्ययो भवति। कुतः। यतः। ततः। बहुतः॥

## तसेश्च। (८/१९६५)

'प्रतियोगे पञ्चम्यास्तसिः' (५.४.४४/२१११), 'अपादाने चाहीयरुहोः' (५.४.४५/२११२) इति वक्ष्यति। तस्य तसेः किंसर्वनामबहुभ्यः परस्य तसिलादेशो भवति। कुत आगतः। यतः[6]। ततः[7]। बहुत आगतः। तसेस्तसिल्वचनं स्वरार्थं [8]विभक्त्यर्थं च॥

## पर्यभिभ्यां च। (९/१९६६)

परि अभि इत्येताभ्यां तसिल् प्रत्ययो भवति। सर्वोभयार्थे वर्तमानाभ्यां [9]प्रत्यय इष्यते। परितः। सर्वतः इत्यर्थः। अभितः। उभयतः इत्यर्थः॥

## सप्तम्यास्त्रल्। (१०/१९६७)

[10]किंसर्वनामबहुभ्यः सप्तम्यन्तेभ्यः त्रल् प्रत्ययो भवति। कुत्र। यत्र। तत्र। बहुत्र॥

## इदमो हः। (११/१९६८)

इदमः सप्तम्यन्ताद् हः प्रत्ययो भवति। त्रलोऽपवादः। इह॥

---

1. अन् अष्टाध्यायी. म. भा. (2.403) 2. स्थाने इत्यधिकम् क. 3. इत्था हैतौ छन्दसि – इत्था इत्यधिकम् ड. 4 सर्वैकान्यकियत्तदः काले दा (5.3.15/1964) इत्यधिकम् क. ड. फ. 5. स्वार्थे इत्यधिकम् ड. 6–7. आगतः इत्यधिकम् क. 8. विभक्त्यर्थं च नास्ति क. 9. प्रत्ययः नास्ति फ. 10. किंसर्वनामभ्यः फ.